श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीविजयीन्द्रयति कृतम्

॥ श्री षोडषबाहुनृसिंहाष्टकम् ॥

This document has been prepared by*

Sunder Kidambi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness *śrīmad āṇḍavan* of *śrīraṅgam*

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

॥ श्री षोडषबाहुनृसिंहाष्टकम् ॥

भूखण्डं वारणाण्डं परवरविरटं डंपडंपोरुडंपं
डिंडिंडिंडिं डिडिंबं दहमपि दहमैः झंपझंपैश्चझंपैः।
तुल्यास्तुल्यास्तु तुल्याः धुमधुमधुमकैः कुङ्कुमाङ्कैः कुमाङ्कैः
एतत्ते पूर्णयुक्तं अहरहकरहः पातु मां नारसिंहः॥ १॥

भूभृद्भूभृद्भुजङ्गं प्रलयरववरं प्रज्वलद्ज्वालमालं
खर्जर्जं खर्जदुर्जं खिखचखचखचित्खर्जदुर्जर्जयन्तम्।
भूभागं भोगभागं गगगगगगनं गर्दमर्त्युग्रगण्डं
स्वच्यं पुच्यं स्वगच्यं स्वजनजननुतः पातु मां नारसिंहः॥ २॥

एनाभ्रं गर्जमानं लघुलघुमकरो बालचन्द्रार्कदंष्ट्रो
हेमांभोजं सरोजं जटजटजटिलो जाडयमानस्तुभीतिः।
दन्तानां बाधमानां खगटखगटवो भोजजानुस्सुरेन्द्रो
निष्प्रत्यूहं सराजा गहगहगहतः पातु मां नारसिंहः॥ ३॥

शङ्खं चक्रं च चापं परशुमशमिषुं शूलपाशाङ्कुशास्त्रं
बिभ्रन्तं वज्रखेटं हलमुसलगदाकुन्तमत्युग्रदंष्ट्रम्।
ज्वालाकेशं त्रिनेत्रं ज्वलदनलनिभं हारकेयूरभूषं
वन्दे प्रत्येकरूपं परपदनिवसः पातु मां नारसिंहः॥ ४॥

पादद्वन्द्वं धरित्रीकटिविपुलतरो मेरुमध्यूढ्वमूरुं
नाभिंब्रह्माण्डसिन्धुः हृदयमपि भवो भूतविद्वत्समेतः।
दुश्चक्राङ्कं स्वबाहुं कुलिशनखमुखं चन्द्रसूर्याग्निनेत्रं
वक्त्रं वह्निस्सुविद्युत्सुरगणविजयः पातु मां नारसिंहः॥ ५॥

नासाग्रं पीनगण्डं परबलमथनं बद्धकेयूरहारं
रौद्रं दंष्ट्राकरालं अमितगुणगणं कोटिसूर्याग्निनेत्रम्।

गाम्भीर्यं पिङ्गलाक्षं भ्रुकुटितविमुखं षोडशाधार्धबाहुं
वन्दे भीमाट्टहासं त्रिभुवनविजयः पातु मां नारसिंहः ॥ ६ ॥

के के नृसिंहाष्टके नरवरसदृशं देवभीत्वं गृहीत्वा
देवन्द्यो विप्रदन्दं प्रतिवचन पयायाम्यनप्रत्यनैषीः।
शापं चापं च खड्गं प्रहसितवदनं चक्रचक्रीचकेन
ओमित्ये दैत्यनादं प्रकचविविदुषा पातु मां नारसिंहः ॥ ७ ॥

झंझंझंझंझकारं झष झष झषितं जानुदेशं झकारं
हुंहुंहुंहुं हकारं हरित कहहसा यं दिशे वं वकारम्।
वंवंवंवं वकारं वदनदलिततं वामपक्षं सुपक्षं
लंलंलंलं लकारं लघुवणविजयः पातु मां नारसिंहः ॥ ८ ॥

भूतप्रेतपिशाचयक्षगणशः देशान्तरोच्चाटना
चोरव्याधिमहज्वरं भयहरं शत्रुक्षयं निश्चयम्।
सन्ध्याकाले जपतमष्टकमिदं सद्भक्तिपूर्वादिभिः
प्रह्लादेव वरो वरस्तु जयिता सत्पूजितां भूतये॥ ९ ॥

॥ इति श्री षोडषबाहुनृसिंहाष्टकं संपूर्णम् ॥